# Shri Panchaksharartha Stava

# શ્રીપઞ્ચાક્ષરાર્થસ્તવઃ

## Document Information

Text title : Shri Panchaksharartha Stava 06 24

File name : panchAkSharArthastavaH.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-24

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2021

*sanskritdocuments.org*

# Shri Panchaksharartha Stava

# શ્રીપઞ્ચાક્ષરાર્થસ્તવઃ

। ષડક્ષરશ્લોકાઃ ।
ઓમિત્યેકાક્ષરોઽસિ પ્રકૃતિવિરહિતસ્ત્વોમિતીદં ચ સર્વમ્ ।
ત્વત્તો ભિન્નં ન ચૈતચ્છિવ તવ મહિમાં (મહિતં) વક્તિ વેદઃ સદૈવોં
??????????????????? missing in manuscript
??????????????????? ॥ ૧॥

ઈશાનસ્ત્વં સર્વવિદ્યાધિનાથ ઉદ્ગીત (થ) સ્ત્વં વાચકસ્ત્વં તથૈવોમ્ ।
માતા માનં માતૃકાખ્યાનસિદ્ધિઃ શબ્દાદીનાં મૂલમીશસ્તથૈવોમ્ ॥ ૨॥

નમસ્તે રુદ્રસ્ત્વં શ્રુતિગતમનોઽન્તૈકવચસાં
ભવાનન્તો નાથો નતિકરણનાનાવિધતનુઃ ।
ન હિ ત્વત્તો ભિન્નં જગદપિ ચ નાનૈવ હિ મૃષા
નમઃ શેષી દેવો ન હિ શિવ વિવાદઃ શ્રુતિબલાત (?) ॥ ૩॥

મહાનાત્મા માયાવિરહિતશરીરો મનુગતો
મહેશો મન્ત્રાર્થસ્ત્વમસિ મતિદાતા મનસિગઃ ।
મનરવી મધ્યસ્થો મરણજનાનાદ્યન્તરહિતો
મધુર્મન્તા માતા ભવસિ હર મન્વર્ચિતપદઃ ॥ ૪॥

શિવઃ શિષ્ટો નિષ્ઠો ભવસિ શિપિવિષ્ટઃ શિવતરઃ
સિનીવાલ્યઃ ખલ્યઃ શશિધર શિખાસૂક્તિમહિમા ।
શિખી નેત્રો યન્તા ભવસિ શિતિકણ્ઠસ્ત્વમસિધૃક્
શતાવર્તો હતો ત્વમસિ ભવહર્તાસિ જગતાં (?) ॥ ૫॥

વાહીકૃતોક્ષ ભગવન્ હર વામદેવ
વાતાશનાધિપતિભૂષિતદિવ્યકાય ।
વાસ્તવ્યવાસ્તુપ મહેશ્વર વામનેત્રા-
ક્લૃપ્તાર્ધકાય ભગવન્ નવવારણારે ॥ ૬॥

યતો જાતં વિશ્વં યમયતિ તથાન્તે ચ યદૃતે
    ન હિ સ્વસ્થં યસ્માન ભવતિ તથા નો નગતિકમ્ ।
યમાત્માનં સર્વે ન હિ ખલુ વિજાનન્તિ તમસઃ
    પરં પારં યત્તદ્ભવસિ યતતાં વૈ નિયમિતા ॥ ૭॥

પઞ્ચાક્ષરાર્થસ્તવમેતદેવમ્પઠન્તિ યેવાધ્યવસન્તમાંશિવે ।
(પઞ્ચાક્ષરાર્થસ્તવમેતમેવમ્પઠન્તિ યે ચાધ્યવસાયવન્તઃ ।)
ત એવ ધન્યા જગતીતલેઽસ્મિન્ તેષાં હિ મુક્તિઃ કરગા ભવેન્નનુ ॥ ૮॥

ઇતિ શ્રીશિવપઞ્ચાક્ષરાર્થસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan

*Shri Panchaksharartha Stava*
pdf was typeset on September 19, 2021

Please send corrections to *sanskrit@cheerful.com*